|| **श्री स्वामी सामर्थ** ||

---

## || श्री योनि स्तवराज: स्तोत्र ||

---

श्री महादेव उवाच--

अस्य श्री योनि स्तवराजस्य कुलाचार्य-ऋषि: कौलिकच्छन्द: ।

श्री योनि रूपा दश विद्यात्मिका देवता सर्वसाधने विनियोग:।

ॐ योनिरूपे महामाये सर्व्वसम्पतप्रदे शुभे।

कृपया सर्वसिद्धिं मे देहि देवि जगन्मयि ॥ १॥

सर्वस्वरूपे सर्वेशे सर्वशक्ति समन्विते।

कृपया सर्वसिद्धिं मे देहि देवि जगन्मयि ॥२॥

महाघोरे महाकालि ! कुलाचारप्रिसे सदा।

कृपया सर्वसिद्धिं मे देहि देवि जगन्मयि ॥३॥

घोरदंष्ट्रे चोग्रतारे सर्वशत्रुविनाशिनि ॥

कृपया सर्वसिद्धिं मे देहि देवि जगन्मयि ॥४॥

योनिरूपा महाविद्ये सर्वदा मोक्षदायिनी।

कृपया सर्वसिद्धिं मे देहि देवि जगन्मयि ।।५।।

जगद्धात्रि महाविद्ये जगदुद्धारकारिणि।
कृपया सर्वसिद्धिं मे देहि देवि जगन्मयि ।।६।।

जगद्धात्रि महामाये योनिरूपे सनातनि।
कृपया सर्वसिद्धिं मे देहि देवि जगन्मयि ।।७।।

जय देवि जगन्मातः सृष्टि स्थित्यन्तकारिणी ।
कृपया सर्वसिद्धिं मे देहि देवि जगन्मयि ।।८।।

सिद्धिदात्रि महामाये सर्वसिद्धि-प्रदायिनि।
कृपया सर्वसिद्धिं में देहि देवि जगन्मयि ।।६।।

महालक्षिम महादेवि महा-मोक्ष-प्रदायिनि।
कृपया सर्वसिद्धिं मे देहि देवि जगन्मयि ।।१०।।

गौरी लक्ष्मीश्च मातगी दुर्गा चं नव-चण्डिका ।
बगलामुखी भुवनेशी भैरवी च तथा प्रिंये।
छिन्नमस्ता च काली च योनि-रुपा सनातनी।
कृपया सर्वसिद्धिं मे देहि देवि जगन्मयि ।।११।।

काली कपालिनी कुल्ला कुरु-कुल्ला वीरोधिनी।
नायिका विप्रचित्ताद्या अन्या या नायिका स्मृता:।
वसन्ति योनिमाश्रित्य ताभ्योषपीह नमो नम: ।।१२।।

अणिमाद्यष्टसिद्धिश्च वसत्यस्या: समीपत: ।
नमस्तेऽस्तु नमस्तेऽस्तु योग-मोक्ष-प्रदायिनि।। १३।।

सर्वशक्तिमये देवि सर्वकल्मषनाशिनि।
हे योने हर विघ्न मे सर्वसिद्धिं प्रयच्छ में ।।१४।।

आधारभूते सर्व्वेषा पूजकानां प्रियम्वदे ।
स्वर्गपाताल वासिन्ये योनये च नमो नम: ।।१५।।

विष्णुसिद्धिप्रदे देवी शिवसिद्धि प्रदायिनी।
ब्रह्मसिद्धिप्रदे देवि रामचन्द्रस्य सिद्धिये।
शक्रादीनाश्च सर्वेषां सिद्धिदाये नमो नम: ।।१६।।

फ़ल्श्रुति

इति ते कथित देवि सर्वसिद्धि प्रदायकम् ।
स्तोत्र योनेर्न्महेशानि प्रकाशयामि ते प्रिये।।
सर्वसिद्धिप्रदं स्तोत्र यः पठेत् कौलिक: प्रिये।
लिखित्वा पुस्तके देवि रक्तद्रव्यैश्च सुन्दरि।।

तस्या-साध्यानि कर्म्माणि वश्यादीनि कुलेश्वारि।
नास्ति नास्ति पुनर्नास्ति नास्त्येव भुवनत्रये।
यः पठेत् प्रातरुत्थाय गाणपत्यं लभेन्नर:।।
रात्री कान्तासमायोगे यः पठेत् साधकोत्तम:।
स्तवेनानेन संस्तुत्य साधक: कि न साधयेत्।।
सालङ्कृतां स्वकान्ताश्च लीलाहावविभूषिताम् ।
रक्त वस्त्र परीधानां कृत्वा संपूज्य साधक: ।
भोजयित्वा ततो देवि स्वयं भुजीत तत्पर:।।
मत्स्यमांसादिकान् भुक्त्वा क्रोड़े कृत्वा स्वयोषितम्।
रात्रो यदि जपेन्मन्त्र सा दुर्गा स सदाशिव:।
भवत्येव न सन्देहो मम वकक्त्राद्दिनिर्गतम्।।
येन दत्त मयि स्तोत्र स एव मद्गुरु: स्मृते:।
तस्यैव यदि भक्ति: स्यात् स भवेजजगदीश्वर: ।।
नमोऽस्तु स्तवराजाय नमः स्तवप्रकाशिने।
यत्रास्ते स्तवराजोऽयं तत्रास्ते श्रीसदाशिव:।।
इति शक्तिकागमसर्वस्वे हरपार्वतीसंवादे श्री योनि स्तवराज: समाप्त: ।

---

।। श्री गुरुदत्तात्रेयार्पणमस्तु ।।

|| श्री स्वामी समर्थार्पण मस्तु||

---